चरणम् । यथा, रघौ । ४ । ५३ ।
"खर्ज्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः" ।
"अधः प्रतिहतो वायुः श्लेष्मणा मारुतेन च" ।
"करोत्युद्गारबाहुल्यम्" इति भावप्रकाशे मध्य-
खण्डे वातरोगाधिकारे ॥ वमनप्रकारादिकं वमन-
शब्दे द्रष्टव्यम् ॥ यथा, शारदातिलकटीकायां,—
"उद्गारे नागइत्युक्तो नीलजीमूतसन्निभः" ॥)

उद्गीतं, त्रि, (उदुच्चैर्गीयते स्म । उत् + गै + क्त ।)
उच्चैर्गीतम् । इति देवीमाहात्म्यम् ॥ (यथा,—
मार्कण्डेये ८४ । ९ ।
"शब्दात्मिकासुविमलर्ग्यजुषां निधान-
मुद्गीतरम्यपदपाठवताञ्च साम्नाम्" ॥)

उद्गीथः, पुं, (उत् + गै + थक् ।) सामवेदभेदः ।
प्रणवः । इत्यमरटीकायां भरतः ॥
("अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
भूयांस उद्गीथविदो वसन्ति" ॥
इति उत्तररामचरिते । २याङ्के" ।)
सामवेदध्वनिः । इत्यरुणः ॥ सामगानम् । इति
सारसुन्दरी ॥ साम्नां द्वितीयोऽध्यायः । इति भगी-
रथः ॥ (भवपुत्त्रः । इति विष्णुपुराणम् ॥)

उद्गूर्णं, त्रि, (उत् + गूर + क्त ।) उद्यतम् । इत्य-
मरः ॥ उत्तोल्यधृतवस्त्रादि । इति भरतः ॥

उद्ग्राहः, पुं, (उत् + ग्रह + घञ् ।) उद्ग्रहणम् ।
ऊर्द्ध्वीकृत्य कस्यचित् ग्रहणम् । इत्यमरः ॥ विद्या-
विचारः । इति भरतः ॥

उद्ग्राहितः, त्रि, (उत् + ग्रह + णिच् + क्त ।)
उद्दीर्णः । बद्धः । ग्राहितः । इति मेदिनी ॥ उप-
न्यस्तः । इति हेमचन्द्रः ॥

उद्घः, पुं, (उद्धन्यते इति । उत् + हन् + कर्म्मणि
अप् । टिलोपात् घत्वं च निपातनात् । यद्वा
उद्धन्ति नीचताम् । उत् + हन् + ड ।) प्रशस्तः ।
प्रकाण्डः । इत्यमरः ॥ (हस्तपुटम् । अग्निः ।
शरीरस्थो वायुः ॥)

उद्घनः, पु, (ऊर्द्ध्वं हन्यतेऽस्मिन् । उत् + हन +
अप् । निपातनात् हस्य घः ।) यत्र काष्ठे काष्ठं
निधाय तक्ष्यते तत् । इत्यमरः ॥ परकाठ इति
भाषा ॥ (यथा, भट्टिः ७।६२ ।
"तस्मिन्नन्तर्घने पश्यन् प्रधाने सौधसद्मनः ।
लौहोद्घनघनस्कन्धा ललितापघनां स्त्रियम्" ॥)

उद्घर्षणं, क्ली, (उत् + घृष + ल्युट् ।) गात्रादिघर्षणं ।
इष्टकया उद्घर्षणगुणाः । कण्डुकोठनाशित्वम् ।
त्वग्गताग्नितेजनत्वम् । शिरासुखकारकत्वञ्च । इति
राजवल्लभः ॥
("उद्घर्षणन्तु विज्ञेयं कण्डुकोठानिलापहम्" ।
इति चिकित्सितस्थाने चतुर्विंशेऽध्याये सुश्रुते-
नोक्तम् ॥ समासकथनं । उद्देशः । यथा । शल्य-
मिति ॥ इति सुश्रुते उत्तरतन्त्रे ६५ अध्याये ॥)

उद्घसं, क्ली, (उत् + अद् + अप् । घसादेशः ।)
मांसम् । इति हारावली ॥

उद्घाटः, पुं, (उत् + घट् + घञ् ।) गृहभेदः । इति
त्रिकाण्डशेषः ॥ चौकिर घर थाना इत्यादि भाषा ।
(उद्घाटनम् ॥)

उद्घाटकं, क्ली, (उत् + घट् + णिच् + ण्वुल् ।) कूपा-
ज्जलोत्तोलनार्थयन्त्रविशेषः । तत्पर्य्यायः । घटी-
यन्त्रम् २ । इति हेमचन्द्रः ॥

उद्घाटनं, क्ली, (उत् + घट् + णिच् + ल्युट् ।) कूपात्
जलोत्तोलनार्थं रज्जुसहितघटः । तत्पर्य्यायः ।
घटीयन्त्रम् २ । इत्यमरः ॥ उत्तोलनम् । इति
भरतः ॥ (यथा, हितोपदेशे । मित्रप्राप्तौ ॥
"धर्म्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्-
घाटनम्" ॥)

उद्घाटितः, त्रि, (उत् + घट् + णिच् + क्त ।) कृतो-
द्घाटनम् । खोला इति भाषा ॥
("गृहेऽनुद्घाटितद्वारि नाहूतः प्रविशेन्नरः ।
वारितार्थप्रवक्तापि पश्चाहमशनं त्यजेत्" ॥
इति स्मृतिः ॥ तन्त्रशास्त्रम् ॥)

उद्घाटितज्ञः, त्रि, (जानाति इति ज्ञः । उद्घाटितस्य
ज्ञः । उद्घाटित + ज्ञा + क ।) प्राज्ञः । इति
त्रिकाण्डशेषः ॥

उद्घातः, पुं, (उत् + हन् + घञ् ।) आरम्भः । इत्य-
मरः ॥ (यथा, कुमारे २ । १२ ।
"उद्घातः प्रणवो यासां न्यायस्त्रिभिरुदीरणम्" ।
"आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः" ।
इति रघुवंशे । ४ । २० ॥) अस्त्रम् । ग्रन्थपरि-
च्छेदः । इति त्रिकाण्डशेषः ॥ पादस्खलनम् ।
("ययावनुद्घातसुखेन मार्गम्" । इति रघुः ।२।७२।
"रथेनानुद्घातस्तिमितगतिना" । इति शाकुन्तले ।
६ अङ्के ॥ समुपक्रमः । पवनाभ्यासयोगाय कुम्भ-
कादिचयम् । उत्तुङ्गः । (यथा, रामायणे ४ काण्डे
"पृथुशृङ्गशिलोद्घातः" । इति ॥) मुद्गरम् ।
इति मेदिनी ॥

उद्झ, श त्यागे । इति कविकल्पद्रुमः ॥ (तुदां-परं-
सकं-सेट् ।) झस्वादिर्दन्त्यवर्गतृतीयोपधः । क्विपि
समुत्समुद्भ्याम् । स्यादौ नवद्म इति उज्झिझिषति
औज्झिझत् । श उज्झती उज्झन्ती । इति
दुर्गादासः ॥

उद्दंशः, पुं, (उत् + दन्श + अच् ।) कीटविशेषः ।
तत्पर्य्यायः । मत्कुणः २ कोणकुणः ३ किटिभिः ४
उत्कुणः ५ । इति हेमचन्द्रः ॥

उद्दण्डपालः, पुं, (उद्दण्ड इव पाल्यते इति । उद्दण्ड
+ पाल + + घञ् ।) सर्पविशेषः । मत्स्यभेदः । इति
मेदिनी ॥

उद्दन्तुरः, त्रि, (उत् अतिशयेन दन्तुरः ।) उत्तुङ्गः ।
करालः । उत्कटदन्तः । इति मेदिनी ॥

उद्दानं, क्ली, (उत् + दो + ल्युट् ।) बन्धनम् । इत्य-
मरः ॥ (यथा, महाभारते । शान्तिपर्व्वणि ।
"उद्दाने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः" ।)
उद्गमः । चुल्ली । वाड़वाग्निः । मध्यः । लग्नः । इति
विश्वः ॥

उद्दामः, त्रि, (दाम्नः उद्गतः ।) बन्धनरहितः ।
स्वतन्त्रः । इति मेदिनी ॥ (यथा, रघुः । ९ । ७८ ॥
"नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे" ॥
"अत्यङ्कुशमिवोद्दामं गजं मदजलोद्धतम्" ।
इति रामायणे ॥) महान् । यथा । "उद्दामदन्तुर-
विधुन्तुददन्तघातैः" । इति प्रव्रज्या ॥
("उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि" ।
इति मेघदूते । २७ ॥ गम्भीरः । यथा भागवते
१ मस्कन्धे । "उद्दामभावपिशुनामलवल्गुहासु" ॥)

उद्दामः, पुं, (उद्गीर्णं दाम पाशो यस्य । समासे अच् ।)
वरुणः । इति मेदिनी ॥ (दण्डकभेदश्छन्दोविशेषः ।
यथा, वृत्तरत्नाकरे ।
"यदि नयुगलं ततः सप्तरेफा-
स्तदा दण्डवृद्धिप्रयातो भवेद्दण्डकः ।
प्रतिचरणविवृद्धरेफाः स्युरर्णार्णव-
व्यालजीमूतलीलाकरोद्दामशङ्खादयः" ॥)

उद्दालः, पुं, (उत् + दल + घञ् ।) बहुवारकवृक्षः ।
इत्यमरः ॥ वनकोद्रवः । इति रत्नमाला ॥

उद्दालकः, पुं, (उद्दाल एव । स्वार्थे कन् ।) बहुवा-
रकवृक्षः । इति शब्दरत्नावली ॥ (मुनिभेदः ।
स तु आयोदधौम्यस्य शिष्यः । तस्य नामोत्पत्ति-
रुक्ता महाभारते १ । पौष्योपाख्याने ३ अध्याये ।
"एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यो नामायोदस्तस्य
शिष्यास्त्रयो बभूवुःउपमन्युरारुणिर्वेदश्चेति । २३ ॥
स एकं शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास गच्छ
केदारखण्डं बधानेति । २४ । स उपाध्यायेन
संदिष्ट आरुणिः पञ्चाल्यस्तत्र गत्वा तत्केदारखण्डं
बन्धुं नाशकत् ॥ २५ ॥ स क्लिश्यमानोऽपश्य-
दुपायं भवत्वेवं करिष्यामीति ॥ २६ ॥ स तत्र
संविवेश केदारखण्डे शयाने च तथा तस्मिंस्तदु-
दकं तस्थौ । २७ ॥ ततः कदाचिदुपाध्यायः
आयोदो धौम्यः शिष्यानपृच्छत् क आरुणिः पा-
ञ्चाल्यो गत इति ।२८॥ ते तं प्रोचुः भगवंस्त्वयैव
प्रेषितो गच्छ केदारखण्डं बधानेति । स एवमुक्त-
स्तान् शिष्यान् प्रत्युवाच तस्मात् तत्र सर्व्वे
गच्छामः यत्र स गत इति ॥ २९ ॥ स तत्र गत्वा
तस्याह्वानाय शब्दं चकार भो आरुणे पाञ्चाल्य
क्वासि वत्स एहीति ॥ ३० ॥ स तत् श्रुत्वारुणि-
रुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसो-
त्थाय तमुपाध्यायं उपतस्थे ॥ ३१ ॥ प्रोवाच
चैनमुपाध्यायं अयमस्मात्र केदारखण्डे निःसर-
माणमुदकमवारणीयं संरोद्धुं संविष्टो भगवत्-
शब्दं श्रुत्वैव सहसा विदार्य्य केदारखण्डं भगवन्त-
मुपस्थितः ।३२॥ तदभिवादये भगवन्तमाज्ञापयतु
भवान् किमर्थं करवाणीति ॥ ३३ ॥ स एवमुक्त-
उपाध्यायः प्रत्युवाच यस्मात् भवान् केदारखण्डं
विदार्य्य उत्थितस्तस्मात् उद्दालकएव नाम्ना भवि-
ष्यतीत्युपाध्यायेनानुगृहीतः" । २४ ॥
अपरः स्वनामख्यात ऋषिभेदः । स तु श्वेतकेतु-
पिता । यथा तत्रैव कुन्तीपुत्त्रोत्पत्त्यनुज्ञाने १२२ ॥
"बभूवोद्दालको नाम महर्षिरिति नः श्रुतम् ।
श्वेतकेतुरिति ख्यातः पुत्त्रस्तस्याभवन् मुनिः" ॥ ९ ॥)

उद्दितः, त्रि, (उत् + दो + क्त ।) बद्धः । इत्यमर-
टीकायां भरतः ॥

उद्दीपकः, त्रि, (उत् + दीप् + ण्वुल् ।) उद्दीपनकर्त्ता ॥

उद्दीपनं, क्ली, (उत् + दीप् + ल्युट् ।) प्रकाशनम् ॥